क्लेशिष्यन्-क्लेक्ष्यन्-न्ती-ती, क्लेशयिष्यन्-न्ती-ती, चिक्लिशिषिष्यन्-चिक्ले-
शिषिष्यन्-चिक्लिक्षिष्यन्-न्ती-ती ;—

—— क्लेशयमानः, क्लेशयिष्यमाणः, चेक्लिश्यमानः, चेक्लिशिष्यमाणः ;

[1]क्लिट्-क्लिशौ-क्लिशः, [2]क्लेट्-क्लेशौ-क्लेशः ; — —

[3]क्लिशितम्-तः-[A]तवान्, क्लिष्टम्-ष्टः-ष्टवान्, क्लेशितः-तम्, चिक्लिशिषितः-
चिक्लेशिषितः-चिक्लिक्षितः-तवान्, चेक्लिशितः-तवान् ;

क्लिशः, [4]क्लेशकः[B], क्लेशः, चिक्लिशिषुः-चिक्लेशिषुः-चिक्लिक्षुः, चेक्लिशः ;

क्लेशितव्यम्-क्लेष्टव्यम्, क्लेशयितव्यम्, चिक्लिशिषितव्यम्-चिक्लेशिषितव्यम्-
चिक्लिक्षितव्यम्, चेक्लिशितव्यम् ;

क्लेशनीयम्, क्लेशनीयम्, चिक्लिशिषणीयम्-चिक्लेशिषणीयम्-चिक्लिक्षणी-
यम्, चेक्लिशनीयम् ;

क्लेश्यम्, क्लेश्यम्, चिक्लिशिष्यम्-चिक्लेशिष्यम्-चिक्लिक्ष्यम्, चेक्लिश्यम् ;

ईषत्क्लेशः-दुष्क्लेशः-सुक्लेशः ; — — —

क्लिश्यमानः, क्लेश्यमानः, चिक्लिशिष्यमाणः-चिक्लेशिष्यमाणः-चिक्लिक्ष्य-
माणः, चेक्लिश्यमानः ;

क्लेशः, क्लेशः, चिक्लिशिषः-चिक्लेशिषः-चिक्लिक्षः, चेक्लिशः ;

क्लेशितुम्-क्लेष्टुम्, क्लेशयितुम्, चिक्लिशिषितुम्-चिक्लेशिषितुम्-चिक्लि-
क्षितुम्, चेक्लिशितुम् ;

क्लिष्टिः, क्लेशना, चिक्लिशिषा-चिक्लेशिषा-चिक्लिक्षा, चेक्लिशा ;

क्लेशनम्, क्लेशनम्, चिक्लिशिषणम्-चिक्लेशिषणम्-चिक्लिक्षणम्,
चेक्लिशनम् ;

---

1. 'व्रश्च भ्रस्ज—' (8-2-36) इत्यादिना षत्वे जश्त्वचर्त्वयोरूपम् ।
2. 'अन्येभ्योऽपि—' (3-2-75) इत्यादिना विच् । गुणः ।
3. 'क्लिशः क्त्वानिष्ठयोः' (7-2-50) इति वा इट् । 'यस्य विभाषा' (7-2-15) इत्यस्य बाधकः ।
4. 'निन्दहिंसक्लिशखाद—' (3-2-146) इत्यादिना ताच्छील्ये वुञ् ।

A. 'उपद्रुतश्चिरं द्वन्द्वैर्ययोः **क्लिशितवानहम्** ॥' भ. का. 22-7.

B. 'निन्दको रजनिम्मन्यं दिवसं **क्लेशको** निशाम् ।' भ. का. 7-13.

Indologisches Seminar der Universität Bonn